# दत्तकस्य वयो विचारः

विकाश सरकारः

धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानः । धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमुच्यते । धर्मशास्त्रं मुख्यतः पुरुषार्थचतुष्टयं प्रतिपादयति । तेषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्तकरूपेण तथा नियन्त्रकरूपेण धर्मस्य प्राधान्यं स्वीक्रियते । जीवनस्य सर्वेषु कालेषु धर्मस्य प्रभावः साक्षात् परम्परया वा दृश्यते । पुरुषार्थेषु पुरुषस्य प्रवृत्तिः सुखायैव भवति । जीवमात्रस्य आशय अभीष्टमेव सुखम् । तस्मात् धर्मार्थकामाः पुरुषार्थाः प्रथमतः आहरणीयाः । अनन्तरं स्वतः एव मोक्षः लभ्यते । अर्थः यद्यपि अनर्थस्य कारणं तथापि धर्मेणोपार्जितोऽर्थः मनुष्यं सर्वविधानन्देन संयोज्य परवर्तिजीवनमपि सुखमयं करोति धर्मशास्त्रम् ।

धारणाद्धर्म इत्याहुर्धर्मो धारयते प्रजाः ।[1]
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चय ।। इति

जगतः धारकत्वेन धर्मस्य महत्वं दरीदृश्यते । धर्मरहितमनुष्यस्य न कोऽपि विशेषः दृश्यते । धर्मवलेन एव मनुष्यस्य हिताहित - कर्तव्याकर्त्तव्यविषये च ज्ञानोदयः भवति । तेन ज्ञानवलेन सः यशोलाभं कर्तुं संसारे अर्हति । एतद् भवपारावारतरणाय धर्म एव लोकानां एका सरणिः । प्रसिद्धस्यास्य धर्मस्य कीदृशोऽर्थः कीदृशं स्वरूपं का चास्य आवश्यकता इति विषये प्रतिपादनीयमस्ति । धर्मशब्दस्य व्युत्पत्तिः विद्वद्जनैः त्रिधा विभज्यते । यथा - ध्रियते लोकः अनेन, धरति धारयति वा लोकं ध्रियते लोकयात्रानिर्वाहार्त यः स धर्मः, अर्थात् येन माध्यमेन लोकानां धारणं भवेत् यश्च लोकानां सुनिर्वाहार्थं संसारं धारयेत् स एव धर्मपदवाच्यः भवति । पुनश्च यः पतनाभिमुखमानवमुन्नतिमार्गं प्रदर्शयति, स एव धर्मः । प्रथमतः धृञ् धारणपोषणयोः इत्यस्माद्धातोः मन् प्रत्ययकृते निष्पन्नोऽयं धर्मशब्दः । वस्तुतः अयमेव धर्मः विश्वस्य धारकरूपेण जनानां पालकरूपेण च स्वीक्रियते ।

धर्मशब्देन सत्य-अहिंसा-अस्तेय-सदाचार-परोपकारादयः अनेकविधा

अर्था परिकल्प्यन्ते। धर्मस्य लक्षणं भगवता मनुना प्रतिपादितं यत्–[2]

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ।।

मनुना धर्मः मनुष्यस्य परमबन्धुत्वेन व्याख्यायते। यथा -

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।[3]
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ।।

धर्मशास्त्रमेव स्मृतिशब्देन व्यवह्रियते 'धर्मशास्त्रम् तु वै स्मृतिः' इति मनुवचनात्।

संसारेऽस्मिन् सर्वेषु शास्त्रेषु वेदेषु च धर्मशब्दस्य प्रयोगः दृश्यते । तत्र क्वचित् नंपुसकलिंगत्वेन क्वचित् च पुंलिङ्गत्वेन धर्मशब्दस्य प्रयोगः दृष्टः । तत्र प्रथमतः ऋग्वेदे धर्मशब्दः नंपुसकलिङ्गत्वेन उपलभ्यते। यथा - 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। तेन नाकं महिमानः सचन्त यत् पूर्वे साध्याः सन्ति देवाः इति। अथर्ववेद धर्मशब्दस्य व्यवहारः पुलिंगत्वेन दृश्यते। वैदिकधर्मस्य ज्ञानं चतुर्दशविद्यामाध्यमेन प्राप्तं भवति। यथा याज्ञवल्क्येन उक्तम्[4] -

पुराणन्यायमीमांसा धर्मशास्त्रांगमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।

पुराणन्यायमीमांसादिषु चतुर्दशविद्यासु धर्मशास्त्रस्य स्थानत्वे सति लोकसुखाय धर्मशास्त्रसाहित्यं प्रामुख्येन त्रिधा विभज्यते । यथा – आचारभागः व्यवहारभागः प्रायश्चित्तभागश्चेति। एतेषु व्यवहारभागः अन्यतमः, सर्वश्रेष्ठः वर्त्तते । व्यवहारेऽपि अष्टादशपदानि प्रसिद्धानि । तेषु दायभागोऽन्यतमः । दायभागे द्वादशविधेषु पुत्रविषयेषु सम्यक् रूपेण विचारितमस्ति । औरसपुत्राभावे दत्तकविधिर्विचार्यते । कर्मणां नित्यनैमित्तिककाम्यानां स्वरूपवर्णनेन दत्तकविधिरूपत्वं प्रतिपाद्यते । 'पुत्रार्थे क्रियते भार्या पुत्रः पिण्डस्य कारणम्', 'नापुत्रस्य लोकोऽस्ति','यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते', इत्याद्यर्थवादाः स्मर्यन्ते । मोक्षेच्छातः प्राक् त्रीणि ऋणान्यवश्यमपाकरणीयानि भवेयुः । अन्यथा नरकगमनं ध्रुवमेव। मानवजीवनस्य चरमलक्ष्यं भवति मोक्षप्राप्तिःयदि ऋणापकरणं

न भवति तर्हिः मोक्षप्राप्तिः नाभवति । यथोक्तं मनुना –[5]

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ।।
अधीत्य विधिवद् वेदान् पुत्रांश्चोत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितो यज्ञैः मनो मोक्षे निवेशयेत् ।। इति ।।

जायमानः मनुष्यः त्रिभिः ऋणैर्जायते । देवऋणं पितृऋणं ऋषिऋणं चेति । देवार्चनेन यागादीनामनुष्ठानेन च देवऋणात्, स्वध्यायाध्ययनेन ऋषिऋणात् मनुष्यःविमुक्तो भवति । पितृऋणं तु पुत्रोत्पादनेन निराक्रियते । पितुरूद्देश्येन पिण्डोदकदानादिना तदृणपरिशोधकत्वेन नरकनिवर्त्तकत्वेन स्वर्गादिप्रापकत्वेन च पितृधने पुत्रोऽधिकारी भवति । अत एव पुत्रस्य भूयसी प्रशंसा लोके श्रूयते । मनुना उक्तम्–[6]

पुत्त्रेण लोकाञ् जयति पौत्त्रेणाऽऽनन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याऽऽप्नोति विष्टपम् ।।

अत्र पुत्रपदं पौत्रप्रपौत्रयोरपि उपलक्षणम् । पुन्नामो नरकात् त्रायते इति पुत्रशब्दस्य व्युत्पत्तेरपि पुत्रस्य पितृनरकोद्धरेण प्रयोजनीयता प्रतिपाद्यते प्रसङ्गेऽस्मिन्नुक्तं मनुना यत्–[7]

पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः ।
तस्मात् पुत्त्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ।।

यद्यपि पुत्रशब्देन सामान्यतः औरस एव पुत्रो गृह्यते ,तथापि तदभावे अन्ये एकादशविधाः पुत्राः तस्य प्रतिनिधिरूपेण वर्त्तन्ते । अत एवोक्तं मनुना प्रसङ्गेऽस्मिन्[8]

औरसःक्षेत्रजश्चैव दत्तः कृत्रिमः एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ।।
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ।।

मनुवचनानुसारं पूर्वे षट्पुत्रा दायहरा अपरे षट् च केवलं ग्रासाच्छादनभागिनो भवन्तीति कथितम्। पूर्वेषु षड्वपि प्राधान्यमौरसस्यैव तस्य धर्मजत्वात्। परन्तु यस्य औरसपुत्रःनास्ति सः दत्तकपुत्रः ग्रहीष्यति।

स्वक्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम्।[9]
तमौरसं विजानीयात् पुत्रं प्रथमकल्पितम्।।

पुत्रेषु औरसो मुख्य इत्यत्र नास्ति सन्देहः। एतद्विषये इदं पूर्वमपि प्रतिपादितम्। मुख्याभावे गौणस्योपादेयता शास्त्रेष्वपि प्रतिपादितम् यद्यपि सत्याषाढसूत्रे स्वामित्वस्य भार्यायाः पुत्रस्य देशस्य कालस्याग्नेर्देवतायाः शब्दस्य च प्रतिनिधिर्नास्तीति प्रतिपादनेन पुत्रस्य प्रतिनिधित्वं निराकृतं तथापि पुत्रप्रतिनिधिमाहुः क्रियालोपान्मनीषिणः इत्यादिमनुवचनात् पुत्रस्य प्रतिनिधित्वमस्त्येव इत्यत्र नास्ति सन्देहस्य लेशावसरः। अतः अलौकपितृणयोः परिहारार्यं तत्पुत्रस्य मरणे पिण्डोदकाद्यर्थं पुनः पुत्रप्रतिनिधिकरणमावश्यकं भवति। अतो यस्य पुत्रः पौत्रः प्रपौत्रश्च न स एव अपुत्र इत्युच्यते। तस्य पुत्रीकरणमुद्दिश्य शास्त्रेषु विधानं विद्यते। अत्र दत्तकस्य योग्यता नाम कीदृशः पुत्रः दत्तको भवितुर्महतीति विचारकोटिमायाति। मनूक्तदत्तकलक्षणे सदृशः पुत्रतुल्यः पुत्रगुणैर्युक्तः इत्यादिकं तात्पर्यम्। सदृशपदेन समानजातीयमिति व्याख्यातं कुल्लुकादिभिः। केन दत्तपुत्रो देय इत्यपि विचारणीयं भवति। सर्वदा बहुपुत्राधिकारीणः पुत्रो दातुं शक्यते इति। यतो हि एकपुत्रस्य पुत्रदाने निषेधात् यः खलु एकपुत्रः स यदि स्वपुत्रं दद्यात् तर्हि दाता स्वयमपुत्रो भवेत्। पुनः शास्त्रे लिखितमस्ति द्वावपि पुत्रौ तथापि स एकं पुत्रं न दद्यात् यतो हि केवलेन एकपुत्रेणापि वन्ध्यत्वं तिष्ठति। सा वन्ध्या काकवन्ध्येत्युच्यते। अतः केवलं बहुपुत्रः स्वकीयेभ्यो अनेकपुत्रेभ्य एकं पुत्रं दद्यादिति। पिण्डोदकदानार्थं दाहादिक्रियार्थं च पुत्रस्यावश्यकता वर्त्तते। अतः योऽपुत्रः सः पुत्रं कर्त्तुं कुर्यात्। मनुनापि प्रसंगेऽस्मिन् प्रतिपादितं यत्–[10]

अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः।
पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च।।
अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्।

अत्रिना उक्तं - [11]

अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा ।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्माप्रयत्नतः ।।

विज्ञानेश्वरेणोक्तं यत्-मात्रा भर्त्रनुज्ञया प्रोषिते प्रेते वा भर्त्तरि पित्रा वा उभाभ्यां वा सवर्णाय यस्मै दीयते स तस्य दत्तकः पुत्रो भवति । अयञ्च दत्तकपुत्रः द्विविधो भवति । केवलदत्तकः द्यामुष्यायणश्चेति । तत्र संविदं विना केवलदत्तकः एवं आवयौरसौ इति संविदा यः दीयते सद्यामुष्यायणः । नन्दपण्डितेनायं दत्तकपुत्रः शुद्धदत्तकद्यामुष्यायणभेदेन द्विधा विभक्तः, पुनः द्यामुष्यायणदत्तकः अपि नित्यानित्यभेदेन द्विधा कृतः । तत्र नित्यद्यामुष्यायणं नाम यः जनकप्रतिग्रहीत्रोरुभयो पुत्रो भवेदित्युक्त्वा दीयते । किन्तु अनित्यद्यामुष्यायणः सो भवति , यस्तु चूडान्तैः संस्कारैः जनकेन संस्कृतः एवमुपयनादिसंस्कारैः प्रतिग्रहित्रा संस्कृतः । एतस्य गोत्रद्वयेन संस्कृतत्वात् द्यामुष्यायणत्वमागच्छति अनित्यया इति तेनोक्तम् ।

दत्तकस्य वयोवस्थाविषये सामान्यतः विचारितमस्ति । क्वचिद्दत्तकः जन्मत आरभ्य,क्वचिज्जातकर्मसंस्कारानन्तरं , क्वचिदुपनयनसंस्कारनन्तरं , क्वचिच्च विवाहानन्तरमपि जातपुत्रोऽपि दत्तकत्वेन केनचिद्दीयते , केनचिद् गृह्यते च । तत्र दत्तकः जन्मतश्चूडाकरणसंस्कारात् पूर्वं वा गृह्यते चेत् स शुद्धदत्तक इत्युच्यते । अन्यथा तस्य दासत्वं न तु दत्तकत्वमिति । तत्र चूडाकरणस्य कः काल इति जिज्ञासायां मनुना प्रतिपादितं यत्– [12]

चूडाकर्म द्विजातीनां सर्वषामेव धर्मतः ।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ।। इति ।।

आश्वलायनेन तृतीयेऽब्दे पञ्चमेऽब्दे वा चूडाकरणं प्रशस्तमित्युक्तम् । यथोक्तं वीरमित्रोदये संस्कारप्रकाशे - [13]

तृतीये पञ्चमे वाब्दे चौलकर्म प्रशस्यते ।
प्राग्वाऽसमे सप्तमे वा सहोपनयनेन वा ।। इति ।।

एतेन ज्ञायते यत् पञ्चमवर्षात् प्रागेव चूडाकरणं प्रशस्तमिति । अतः पञ्चमवर्षपूर्त्तेः प्राग् दत्तको ग्राह्य इत्यत्र सर्वेषामैकमत्यम् । तत्रापि जन्ममात्रेणैव

दत्तकग्रहणं सर्वोत्कृष्टम् । तदपेक्षया कृतजातसंस्कारो गौणः । ततोऽपि कृतनामकरणान्नप्राशनचूडाकरणो गौणतरः । तदनन्तरं कृतचूडस्य कृतोपनयनस्य वादत्तकत्वेन ग्रहणं न प्रशस्तमिति हेतोः तन्निषिद्धम् इति । प्रसङ्गेऽस्मिन् कालिकापुराणवचनमुत्थाप्य दत्तकमीमांसायां नन्दपण्डितेन उक्तं - [14]

दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः ।
आयान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः ।।
पितृगोत्रेण यःपुत्रः संस्कृतः पृथिवीपतेः ।
आचूडान्तं न पुत्रः स पुत्रतां याति चान्यतः ।।
चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ।।
ऊर्ध्वं तु पञ्चमाद् वर्षान्न दत्ताद्याः सुताः नृप ।
गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत् ।।
पौनर्भवं तु तनयं जातमात्रं समानयेत् ।
कृत्वा पौनर्भवस्तोमं जातमात्रस्य तस्य वै ।।
सर्वांस्तु कुर्यात् संस्कारान् जातकर्मादिकान्नरः ।
कृते पौनर्भवे स्तोमे सुतः पौनर्भवः स्मृतः ।। इति ।।

अतः पञ्चवर्षीयो बाल एव दत्तकत्वेन ग्राह्यःतदधिकवयस्कस्य पुत्रत्वाभावौपत्तेर्दासतापतेश्च । अतो दत्तकं ग्रहीतुमिच्छन् कश्चित् जन्मतः आरभ्य पंचवर्षाभ्यन्तरे बालं गृह्णीयात् न तदनन्तरम् ।

## सन्दर्भाः-


1. म.भा. कर्णपर्व 69/58
2. मनु .२/1
3. मनु 8./17
4. या. स्मृ. 1/3
5. म. स्मृ. – ६/35-36
6. म. स्मृ. 9-137
7. म. स्मृ. 9/138

8. म. स्मृ – ९/159 ,160
9. म. स्मृ – ९/166
10. द्.मी. पृ. 9
11. द्.मी. पृ.
12. म.स्मृ. 2-35
13. सं.प्र- पृ.296
14. द्.मी.- पृ- 93

## सन्दर्भग्रन्थसूची


- दत्तकमीमांसा – काशीहिन्दुविश्वविद्यालयः , वाराणसी – १९८०
- मनुस्मृतिः – चौखम्बा संस्कृत संस्थान , वाराणसी – २००३
- महाभारतम् – भण्डारकर ओरि . री . इनष्टि. पुना – १९७२
- संस्कारप्रकाशः – चौ.सं.सी.आफीसवाराणसी – १९८६


❋ ❋ ❋